श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ विश्वकर्मसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ विश्वकर्मसूक्तम् ॥

य इ॒मा विश्वा॒ भुव॑नानि॒ जुह्व॒दृषि॒र्‌हो॒ता॑
  निष॒सादा॑ पि॒ता न॑ः।
स आ॒शिषा॒ द्रवि॑णमि॒च्छमा॑नः
  परम॒च्छदो॒ वर॒ आ वि॑वेश॥ **1**॥

वि॒श्वक॑र्मा॒ मन॑सा॒ यद्विहा॑या धा॒ता
  वि॑धा॒ता प॑र॒मोत स॒न्दृक्।
तेषा॑मि॒ष्टानि॒ समि॒षा म॑दन्ति॒ यत्र॑
  सप्त॒र्‌षीन्प॒र एक॑मा॒हुः॥ **2**॥

यो न॑ः पि॒ता ज॑नि॒ता यो वि॑धा॒ता
  यो न॑ः स॒तो अ॒भ्या सज्ज॒जान॑।
यो दे॒वाना॑ँ नाम॒धा एक॑ ए॒व तग्ं
  स॑म्प्र॒श्नं भुव॑ना यन्त्य॒न्या॥ **3**॥

त आऽय॑जन्त॒ द्रवि॑ण॒ग्ं सम॑स्मा॒
  ऋष॑य॒ः पूर्वे॑ जरि॒तारो॒ न भू॒ना।
अ॒सूर्ता॒ सूर्ता॒ रज॑सो वि॒माने॒ ये
  भू॒तानि॑ स॒मकृ॑ण्वन्नि॒मानि॑॥ **4**॥

न तंविंदाथ य इदं जजानाऽन्यद्
युष्माकमन्तंरं भवाति।
नीहारेण प्रावृंता जल्प्यां चाऽसुतृपं
उक्थ शासंश्चरन्ति॥ 5॥

परो दिवा पर एना पृंथिव्या
परो देवेभिरसुंरैर्गुहा यत्।
कग्ग् स्विद्गर्भं प्रथमं दंध्र आपो
यत्रं देवास्समगंच्छन्त विश्वें॥ 6॥

तमिद्गर्भं प्रथमं दंध्र आपो यत्रं
देवास्समगंच्छन्त विश्वें।
अजस्य नाभावध्येकमर्पितं
यस्मिंन्निदं विश्वं भुवंनमधिं श्रितम्॥ 7॥

विश्वकंर्मा ह्यजंनिष्ट देव
आदिद्गंन्धर्वो अंभवद्द्वितीयंः।
तृतीयंः पिता जंनितौषंधीना -
मपां गर्भं व्यंदधात् पुरुत्रा॥ 8॥

चक्षुंषः पिता मनंसा हि धीरों
घृतमेंने अजनन्नन्नंमाने।

य॒देदन्ता॒ अद॑दृग्ँ॒हन्त॒ पूर्व॒
आदिद्द्यावा॑पृथि॒वी अ॑प्रथेताम्॥ **9**॥

वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो
वि॒श्वतो॑हस्त उ॒त वि॒श्वत॑स्पात्।
सं बा॒हुभ्यां॒ नम॑ति॒ सं पत॑त्रै॒र्द्यावा॑पृथि॒वी
ज॒नय॑न्दे॒व एक॑ः॥ **10**॥

किग्ग् स्वि॑दासीदधि॒ष्ठान॑मा॒रम्भ॑णं
कत॒मथ्स्वि॒त्किमा॑सीत्।
यदी॒ भूमि॑ं ज॒नय॑न्वि॒श्वक॑र्मा॒ वि
द्यामौर्णो᳚न्महि॒ना वि॒श्वच॑क्षाः॥ **11**॥

किग्ग् स्वि॒द्वनं॒ क उ॒ स वृ॒क्ष
आ॑सी॒द्यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः।
मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒
तद्यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॥ **12**॥

या ते॒ धामा॑नि पर॒माणि॒ याऽव॒मा या
म॑ध्य॒मा वि॑श्वकर्मन्नु॒तेमा।
शिक्षा॒ सखि॑भ्यो ह॒विषि॑ स्वधावस्स्व॒यं
य॑जस्व त॒नुव॑ं जुषा॒णः॥ **13**॥

वा॒चस्पतिं᳚ वि॒श्वक॑र्माणमू॒तये॑
मनो॒युजं᳚ वाजे॑ अ॒द्या हु॑वेम।
स नो॒ नेदि॑ष्ठा॒ हव॑नानि जोषते
वि॒श्वशं॑म्भू॒रव॑से सा॒धुक॑र्मा॥ **14**॥

विश्वं॑कर्मन् ह॒विषा॑ वावृधा॒नस्स्व॒यं
यं॑जस्व त॒नुवं᳚ जुषा॒णः।
मुह्यं॑न्त्व॒न्ये अ॒भितः॑ स॒पत्ना॑
इ॒हाऽस्माकं᳚ म॒घवा॑ सू॒रिरं॑स्तु॥ **15**॥

विश्वं॑कर्मन् ह॒विषा॒ वर्धं॑नेन
त्रा॒तार॒मिन्द्रं॑मकृणोरव॒ध्यम्।
तस्मै॒ विश॒स्समं॑नमन्त पू॒र्वीर॒यमु॒ग्रो
विं॑ह॒व्यो॑ यथाऽसं॑त्॥ **16**॥

स॒मु॒द्राय॑ व॒युना॑य॒ सिन्धू॑नां॒ पत॑ये॒ नमः॑।
न॒दीना॒ग्ं॒ सर्वा॑सां पि॒त्रे जु॑हु॒ता
वि॒श्वक॑र्मणे॒ विश्वाऽहाऽम॑र्त्यग्ं ह॒विः॥ **17**॥

ओं शान्ति॒ः शान्ति॒ः शान्तिः॑॥

**॥ इति विश्वकर्मसूक्तं समाप्तम्॥**